International Journal of Sanskrit Research 2019; 5(1): 23-29

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(1): 23-29
© 2019 IJSR
www.anantaajournal.com
Received: 05-11-2018
Accepted: 08-12-2018

**Naveen Bhat S**
Assistant Professor, Sanskrit,
Dayananda Sagar Instituions,
Kumarswamy Layout, Banglore,
Karnataka, India

**Correspondence**
**Naveen Bhat S**
Assistant Professor, Sanskrit,
Dayananda Sagar Instituions,
Kumarswamy Layout, Banglore,
Karnataka, India

# समस्तवेदस्य वेदान्तडिण्डिमत्वम्

**Naveen Bhat S**

**सार**

अस्य ग्रन्थस्य शीर्षिकायामेव ब्रह्माण्डापिण्डाण्डशब्दौ प्रयुक्तौ स्तः । एतयोः स्वरूपं द्रष्टुम् आदौ ब्रह्माण्डपिण्डाण्डयोः स्थूलं रूपं ज्ञातव्यम् ।एतादृश-ज्ञानार्थं वेदेतिहासपुराणादीनि प्रमाणानि भवन्ति । तत्र आदौ ब्रह्माण्डशब्दस्य व्युत्पत्तिः उच्यते यथा ब्रह्माण्डं – ब्रह्मणः जगत्स्रष्टुः अण्डम् चतुर्दशभुवनगोलकः यद्वा ब्रह्मणा विश्वसृजा कृतम् अण्डम् भुवनकोशः इति । समग्रं ब्रह्माण्डं द्विधा विभक्तुं शक्यते । ब्रह्माण्डे भूतसृष्टिः, भौतिकसृष्टिः च इति ।भूतानि च पञ्च एव इति लोके वेदे च प्रसिद्धम् । अत्र पञ्च भूतानि इत्यत्र सर्वदार्शनिकानामपि सम्मतिरस्ति । तानि च भूतानि आकाशः, वायुः, अग्निः, आपः, पृथिवी च इति ।

अस्य प्रपञ्चस्य (भूतानाम्) सृष्टिः विविधासु उपनिषत्सु वर्णिता अस्ति । क्वचित् आत्मसकाशात् सृष्टिः,यथा ‘तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः’[1] प्रश्नोपनिषदि सृष्टिक्रमः एवमुक्तः अस्ति यथा ‘स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च’[2], ‘एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी’[3], तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥‘[45] तदेतत्सत्यं यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति‘॥ इत्यादिरूपेण सृष्टौ वैविध्यं श्रुयते ।

**कूटशब्दाः** व्यष्टिसमष्टिरूपेण अवस्थाभेदः, जीवाभिन्नः परमात्मा, ब्रह्माण्डाभिन्नं पिण्डाण्डम्, देवतासु परमात्मतादात्म्यम्

---

[1] तै.उप – ३/१

[2] प्रश्न. उप – ६/४

[3] मु. उप – २/१/३

[4] मु.उप – १/१/८

[5] मु.उप – २/१

**पीठिका**

वेदस्य चतुर्षु विभागेषु उपनिषदपि अन्यतमा वर्तते । उपनिषदः एव वेदान्ताः इति नामान्तरं श्रूयते । वेदान्तशब्दस्य वेदस्य अन्तिमः भागः इति नार्थः किन्तु वेदस्य सारवत्तमः भागः अथवा निर्णयात्मकः भागः इति अर्थं कथयितुं शक्नुमः । यद्यपि संहितादि विभागेषु देवतास्तुतिः, कर्मप्राधान्यम् इत्यादयः विचारा वर्णिताः तथापि तेषां सर्वेषामपि अवसानभूमिः (तात्पर्यभूमिः) वेदान्तः भवति । अद्वैतवेदान्तपृष्ठभूमौ विचार्यमाणे सति, सृष्टिवाक्यानां सृष्टौ न तात्पर्यं किन्तु ब्रह्मण्येव इतिवत् वेदस्य संहितादि विभागानां तत्र (कर्मण्यादौ) न तात्पर्यं किन्तु उपनिषद्येव इति वक्तुं शक्यम् । यतः चतुर्षु पुरुषार्थेषु परमः पुरुषार्थः मोक्षः इति सर्वैः दार्शनिकैः अङ्गीकृतः वर्तते । नित्यात्मकं आत्यन्तिकसुखस्वरूपमुद्दिश्य एव धर्मादयः प्रवृत्ताः सन्ति। मोक्षस्य स्वरूपविषये, तत्प्राप्तिसाधनानुष्ठानविषये च भिद्यन्ते दर्शनानि । अत ज्ञातुं शक्यते सर्वस्यापि वैदिकवाङ्मयस्य निश्चितार्थः वेदान्ते (मोक्षशास्त्रे) एव विद्यते इति ।तदुक्तं – 'वेदान्तविज्ञानसुनिश्चितार्थाः'[6] 'वेदान्ते परमं गुह्यम्'[7] 'यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः'[8] इति ।

स्वयं ज्ञानस्वरूपाः वेदाः आत्यन्तिकज्ञानप्राप्त्यर्थं देवतास्तवनं, यागानुष्ठानपूर्वकं च चित्तशुद्धिद्वारा सहकुर्वन्ति ।सर्वव्यापकस्य परमात्मनः दर्शनं साधकस्य श्रवण-मनन-निदिध्यासनपूर्वकं भवति। सः परमात्मा व्यष्टि-समष्टिरूपेण अस्मिन् जगति व्याप्तः वर्तते । जागृदाद्यवस्था विवरणकाले एकस्यैव परमात्मनः अवस्थाभेदकाले नामान्तरं माण्डूक्योपनिषदि श्रूयते -

[6] मु. उप – ३/२/५

[7] श्वेता. उप – ६/२२

[8] महा.नार – १०/८

**व्यष्टिसमष्टिरूपेण अवस्थाभेदः**

| **अवस्था** | **व्यष्टिः** | **समष्टिः** |
|---|---|---|
| जाग्रत् | विश्वः | विराट् |
| स्वप्नः | तैजसः | हिरण्यगर्भः |
| सुषुप्तिः | प्राज्ञः | ईश्वरः |
| तुरीयम् | आत्मा | ब्रह्म |

अत्र स्थूलावस्थातः सूक्ष्मावस्थापर्यन्तं व्यष्टि- समष्टिभेदेन परमात्मनः उपाधिभेदेन भेदः

उक्तः । यथा कठोपनिषदि उच्यते 'इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः'[9] एवं स्थूलेन्द्रियादारभ्य अत्यन्तं सूक्ष्मं महद् पुरुषपर्यन्तं प्रतिपाद्य पुरुषः एव परा काष्ठा गतिः च इति कथयति ।

**जीवाभिन्नः परमात्मा**

यद्यपि जीवात्मा परमात्मा इति लोके भेदव्यवहारः श्रूयते तथापि तयोः अभेदः एव अद्वैतं वेदान्ततत्त्वमिति प्रतिपादयति । माण्डूक्यकारिकायां च उच्यते -

भूतं न जायते किञ्चित् अभूतं नैव जायते । विवदन्तो द्वया ह्येवमाजातिं ख्यापयन्ति ते ॥[10]

सृष्टेः पूर्वम् आत्मा एक एवासीत् अद्वितीयः नान्यत्किञ्चिदासीत् । सृष्टेरनन्तरमपि आत्मनः द्वितीयं परं च न कोऽपि आसीत् केवलं शुद्धात्मनः सत्त्वं सर्वत्र व्याप्तमासीत् ।अत्र द्वितीयत्वानित्यत्वस्य ख्यापनं विवादाय केवलं भवति । वाङ्मनसागोचरे अपि आत्मतत्त्वे असकृद्वारम् शास्त्रेण उच्यमानेऽपि विवादं कुर्वन्ति अज्ञानिनः । तदुक्तं - सदसद् सदसद्वापि न किञ्चिद् वस्तु जायते।[11]

[9] कठ. उप -

[10] मा. का – ४/४

[11] मा.का – ४/२२

एकमेव तत्त्वं विद्यते चेदपि नाना इव अवभासते ।एवं मायाकारणात् मानवः भ्रमित्वा अस्मिन् जगति व्यवहरति । या इयं जागृदवस्था अस्माकं सा स्वप्नावस्थान्तर्गता (स्वप्नावस्थावद्) वर्तते । तदुक्तं-

यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः । तथा जाग्रद् द्वयाभासं स्पन्दते मायया मनः ।[12]

नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि । अजायमानो बहुधा मायया जायते तु सः ॥[13]

अस्मिन् जगति यथार्थसत्तारहितानि कार्याणि बहुधा इव दृश्यन्ते चेदपि तदन्तर्गतं कारणम् एकमेव तद्वत् अत्र आकाशात् भूमिपर्यन्तं कार्याणि भिद्यन्त इव न तदन्तर्गतम् आत्माख्यं कारणम् ।तदुक्तं-

मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा । उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥[14]

स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम् । परस्परं विरुध्यन्ते तैरयं न विरुध्यते ॥[15]

एवं साधकस्य आत्मज्ञानिनः श्रवण-मनन-निदिध्यासनरूपसाधनेन विमर्शेण च परमार्थतः ब्रह्मणः अद्वितीयत्वं, नित्यत्वं, उत्पत्तिरहितत्त्वं च साधितं भवति । उक्तम् - अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते । तेषामुभयथाद्वैतं तेनायं न विरुध्यते ॥[16]मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥[17] न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥[18]देवानां पूर्व्ये युगेऽसतः सदजायत ॥ [19]देवानां नु वयं जाना प्रवोचाम विपन्यया । उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥[20] एवं सहस्रशः मन्त्राः कारणाभिन्नकार्यमिति वक्तुं प्रवृत्ताः सन्ति ।तस्य कारणस्य त्रिविधाः सत्ताः प्रसिद्धाः ते च – व्यावहारिकी सत्ता, प्रातिभासिकी सत्ता, पारमार्थिकी सत्ता च इति। तत्र व्यावहारिकपदार्थानां सद्रूपसन्दर्शनेन कारणस्य प्रतिभासिकी सत्ता जायते । इयं च सत्ता व्यावहारिकयथार्थकारणस्य ज्ञानेन निवर्तते ।अधिष्ठानसत्ता साक्षात्कारेण अध्यस्थस्य निवृत्तिः इति नियमः । तथैव व्यावहारिकस्यापि पारमार्थिक्यां सत्तायाम् अध्यस्थत्वात् पारमार्थिक-कारणसाक्षात्कारात् बाध्यते । केवलं पारमार्थिकं कारणं सत्यं भवति ।अत एव मायामात्रमिदं द्वैतं इत्यादयः मन्त्राः उक्ताः। सृष्टेः प्राक् केवलं पारमार्थिकं सत्त्वमासीत् इत्यादिकं च मन्त्रेषु उल्लिखिताः सन्ति ।

**ब्रह्माण्डाभिन्नं पिण्डाण्डम्**

अदितिर्दाक्षाण्या बृहस्पतिना वा दृष्टाः एते मन्त्राः । अत्र आदौ एव देवानां जन्मानि प्रवोचाम इत्येव आरभ्यते – देवताः पूर्वस्मिन् काले उत्पन्नाः अधुना अपि मन्त्रैः स्तुतिमर्हन्ति । याश्च देवताः सर्वान् मानवान् अनुग्रहदृष्ट्या पश्यन्ति तासां उत्पत्तिक्रमान् पश्यामः इति । यथा कर्मार मन्दाग्निं चैतन्यदानेन वर्धयति तथा ब्रह्मणस्पतिः स्वशक्त्या (अमूर्ततत्त्वेन) देवातादीषु चैतन्यमापादयति ।

ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् ।देवानां पूर्व्ये युगेऽसतः सदजायत ॥[21] अत्र ब्रह्मणस्पतिशब्दस्य अन्नस्य अधिपतिः इति अथवा सर्वेश्वरः अथवा सर्वप्रपञ्चनियामकः अदितिः इति वा अर्थनिश्चयः कर्तुं युक्तम् । अत्र देवानां पूर्व्ये युगे इत्यस्य सृष्टेः प्राक् सर्वेऽपि पदार्थाः अव्यक्तरूपेण आसन् तदेव सृष्ट्यनन्तरं नामरूपादिसहितमभूत् ।

असद्वा इदमग्र आसीत् । ततो वै सदजायत ॥ [22] तद्धेदं तर्ह्यव्याकृतमेवासीत्[23] इत्यादीनि वाक्यानि अन्यत्र वेदेषु प्रसिद्धानि

---

[12] मा.का – ३/२६

[13] मा.का – ३/२४

[14] मा.का – ३/१५

[15] वा.प – २/२४०

[16] मा.का – ३/१७,१८

[17] मा.का – १/१७

[18] मा.का – २/३२

[19] ऋग्. सं - १०/७२/२

[20] ऋग्. सं - १०/७२/१

[21] ऋग्. सं - १०/७२/२

[22] तै.उ - २/७

सन्ति । अत्रापि सूक्ते उच्यते –देवानां युगे प्रथमेऽसतः सदजायत। तदाशा अन्वजायन्त तदुत्तानपदस्परि ।[24]अदितिर्द्यौरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्चजना अदितिर्जाता स पुत्रः॥[25] तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥[26] देवाः अमरणधर्माः भजनीयाः उत्पन्नाः ।यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत । अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत॥ [27] यत्र प्रकाशनशीलाः अत्यन्त तेजोभूताः देवाः स्थिताः तत्रैव सलिले नृत्यतामिव चैतन्यमुत्पादयन्ति. तत एव अत्यन्तं तीक्ष्णं रेणुः (तेजसः अंशभूतम्) अजायत ।

आसीद्विश्वा वरुणस्य संराड्विश्वेत्तानि वरुणस्य व्रतानि ।[28] उपायः शिक्षमाणानां बालानामुपलालनाः । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥[29] अविद्यास्तमयो मोक्षः सा संसार उदाहृता । विद्यैव चाद्वया शान्ताऽतस्तमय उच्यते ।[30] सर्वप्रत्ययवेद्ये वा ब्रह्मरूपे व्यवस्थिते । प्रपञ्चस्य प्रविलयः शब्देन प्रतिपाद्यते ॥[31] तत्र आत्मावबोधार्थमात्रस्य विवक्षितत्वात् सर्वोऽयम् अर्थवादः इत्यदोषः । मायाविवद् वा महामायावी देवः सर्वज्ञः सर्वशक्तिः सर्वमेतच्चकार सुखावबोधनप्रतिपत्त्यर्थं लोकविद् आख्यायिकादिप्रपञ्च इति युक्तितरः पक्षः । नहि सृष्ट्याख्यायिकादिपरिज्ञानात् किञ्चित् फलमिष्यते । ऐक्यात्मस्वरूपपरिज्ञानात् त्वमृतत्वं फलं सर्वोपनिषत्प्रसिद्धम् । स्मृतिषु च गीतासु समं सर्वभूतेषु तिष्ठन्तं परमेश्वरम् इत्यादिना॥[32] अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ।[33] एवमुपनिषत्सु ब्रह्माण्डस्य पिण्डाण्डस्य च विचाराः सविस्तरं चर्चिताः सन्ति । एतयोः अभेदः सर्वोपनिषदां तात्पर्यमस्तीति उपनिषन्मन्त्राणामवलोकनेन, भाष्यावलोकनेन च ज्ञायते।

उत्पाद्यमाप्यं संस्कार्यं विकार्यं च क्रियाफलम् । नैवं मुक्तिर्यतस्तस्मात् कर्म तस्या न साधकम् ॥[34]

ब्रह्माद्या ऋषिपर्यन्ताः स्मारकाः न तु कारकाः ।[35]अव्यक्तोऽयं अचिन्त्योऽयमविकार्योऽयमुच्यते । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ [36] यथा सर्वगतं सौक्ष्मादाकाशं नोपलिप्यते । सर्वभावस्थितो देहे तथात्मा नोपलिप्यते ॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥[37]यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा । यो देवानां नामधा एक एव तं संप्रश्नं भुवना यन्त्यन्या ॥[38]

अर्थात् भगवान् परमेश्वरः एव अस्माकं जनिता बन्धुः सखा च भवति । स एव अस्याः दृश्यमानायाः सृष्टेः उत्पादयिता । यः देवताभ्यः नामकरणं कृत्वा स्वस्थाने नियमितवान् स भगवान् एक एव अस्ति। सः सकलेषु चराचरवस्तुषु अन्तर्यामि रूपेण स्थितः इत्यतः सर्वव्याप्तोऽपि अगोचर इव् लोकस्य कृते भातीत्यतः तस्य विषये प्रश्नाः उद्भवन्ति ।

वेदमन्त्राः यागेषु विनियुक्ताः अपि तेषु अध्यात्मार्थबोधकाः मन्त्राः सन्त्येव । अध्यात्मार्थबोधकाः वेदभागाः श्रेष्ठाः परमाःच इति ऋषीणाम्, यास्कादीनाम् आचार्याणां अभिप्रायः । मुण्डकोपनिषदि उच्यते -'अथ परा यया तदक्षरमधिगम्यते' [39] इति,

---

[23] श. ब्रा - १४/२/२/१५

[24] ऋग्. सं - १०/७२/३

[25] ऋग् सं – १/८९/१०

[26] ऋग्. सं – १०/७२/५

[27] ऋग्. सं – १०/७२/६

[28] ऋग्. सं - ८/४२/१

[30] ब्र.सि – ३/१०६

[31] ब्र.सि – ४/३

[32] ऐ.उप – २/९

[33] ब्र.सू – अध्यासभाष्यम्

[34] नै.सि – १/१५३

[35] ब्र.सि – पृ ४५

[36] भा.प्र - नीलकण्ठः -२

[37] भा.प्र - नीलकण्ठः -२

[38] ऋग्. सं - १०/ ८२/३

[39] मु. उप – १/१/५

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् । नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद् भूतयोनिं परिपश्यन्ति धीराः॥[40]
उपनिषद् भागं विहाय सर्वेऽपि वेदभागाः, वेदाङ्गानि च अपरा विद्या इति कथयित्वा तस्याः परा विद्यायाः महत्वमपि वर्णितम् । नारदस्य वचने अपि इदम् अध्यात्मस्य श्रैष्ठ्यं ज्ञातुं शक्नुमः यथा मन्त्रविदेवास्मि नार्थवित् इति । वेदवादरताः पार्थ नान्यदस्तीतिवादिनः इत्यादि भगवद्गीतोक्तप्रकारेणापि इदं ज्ञातुं शक्नुमः । गूढार्थविज्ञानेन विना केवलेन शब्दतः वेदाभ्यासोऽपि निष्फलः इति कथयति स्वयं ऋग्वेदः –
यस्तन्न वेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासत ।[41] इति ।यः शब्दतः केवलं वेदमधीते नार्थतः सः स्थाणुः भवतीति उच्यते । यश्च अर्थज्ञः सुखं प्राप्य स्वर्गलोकं प्राप्नोति इति यास्काचार्यः कथयति । तदुक्तं -'स्थाणुरयं भारहारः किलासीत् अधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञः इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥[42] इति ।
एवं सहस्रशः उच्यमाने अपि ये कर्मठाः केवलं यागादिषु प्रवर्तन्ते तान् उद्दिश्य कथयन्ति यज्ञयागादिना यत् फलम् प्राप्यते तत् अल्पमेव भवति, तादृश अल्पफलप्राप्तये ये यतन्ते ते जरामृत्युलोकं गच्छन्ति इति ऋषयः कथयन्ति –
प्लवाह्येते अदृढा यज्ञरूपाः अष्टादशोक्तमवरं येषु कर्म । एतेच्छ्रेयो नाभिनन्दन्ति मूढाः जरामृत्युं ते पुनरेवापि यन्ति ॥[43] इति ।असच्च सच्च परमे व्योमन् दक्षस्य जन्मन्नदितेरुपस्थे । अग्निर्ह नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनुः ॥[44] अस्मिन् मन्त्रे परब्रह्मणः अग्निरूपत्वेन सर्वव्यापकत्वम् उच्यते। सर्वत्र विद्यमानेषु असत् वस्तुषु सद्वस्तुषु च विद्यमानः सन् सर्वान् नियमयति इति । अहं मनुरभवं सूर्यश्चाहं कक्षीवान् ऋषिरस्मि विप्रः । अहं कुत्समार्जुनेयं न्यृञ्जेऽहं कविरुशना पश्यतामा[45] । केषुचित् मन्त्रेषु ऋषेः सर्वात्मभावं पश्यामः । अत्रापि अयं मन्त्रः सर्वात्मत्वम् अवबोधयति । अहमेव सूर्यः, मनुः, ऋषिः, कुत्सः इत्यादिरूपेण अद्वैतभावं पश्यामः ।आत्मा देवानां भुवनस्य गर्भो यथावशं चरति द्व एषः ।घोषा इदस्य श्रृण्विरे न रूपम् तस्मै वाताय हविषा विधेम॥[46]
यस्मिन् विश्वानि भुवनानि तस्थुः तिस्रो द्यावस्त्रेधा सस्रुरापः । त्रयः कोशास उपसेचनासः मध्वःश्चोतन्त्यभितो विरप्शम् ॥[47] अपि च सत्वानां प्रकृतिभूमभिः ऋषयः स्तुवन्तीत्याहुः' प्रकृति सार्वनाम्याच्च'[48] स एष महान् आत्मा सत्तालक्षणः तत्परं ब्रह्म, स भूतप्रकृतिः, आत्मैवेषां रथो भवति आत्मा अश्वः आत्मा आयुधं आत्मा इषवः आत्मा सर्वं देवस्य देवस्य'[49]। वेदान्तदर्शनस्य उद्गमस्थानम् ऋग्वेदः इति निर्विवादोऽयं विचारः । यथा नद्यः स्वमूलस्थानाद् उत्पन्नाः सन्त्यः शाखोपशाखभेदेन विविधासु दिक्षु प्रवह्य सर्वजनप्राणिकृष्याद्युपयुक्ताः भवन्ति तथा स्मृतिपुराणदर्शनादयः वेदात् उत्पन्नाः सन्तः सर्वजनोपकारकाः भवन्ति ।वेदेषु दर्शनविचारः अनुस्यूतत्वेन सर्वमन्त्रेषु अस्ति चेदपि क्वचिदेव प्रकटीकृतः भवति ।वेदेष्वपि ऋग्वेदः विशिष्टः वेदः इति विदुषामभिप्रायः । सर्वश्रेष्ठविचाराणाम् आगरः ऋग्वेदः भवति । यथा अत्र अग्नि-इन्द्र-वरुण-विष्णु-मरुत्- विश्वेदेवाः इत्यादीनां देवतानां स्तुतिः स्वरूपं कार्याणि च वर्णितानि सन्ति । अत्यन्तनिगूढसृष्टिरहस्यादिकं नासादीयादिभिः मन्त्रपूगैः वर्णितानि। धर्मस्वरूपस्य विवेचनम् अत्र द्रष्टुं शक्नुमः । दानस्तुतिः श्रूयते । विवाहसूक्तानि और्ध्वदैहिकसूक्तानि सामाजिकविचारस्योपरि प्रकाशं प्रयच्छन्ति ।अत्र विद्यमानानि संवादसूक्तानि नाटकस्य मूलमस्ति । क्वचित् आभिचारिकविचाराः अपि उक्ताः सन्ति । उपनिषद् प्रतिपाद्यः आत्मविचारोऽपि

[40] मु. उप – १/१/६

[41] ऋग्. सं - १६४ - ३९

[42] नि – १/१८

[43] मु. उप – १/२/७

[44] ऋग्. सं - १०/५/७

[45] ऋग्. सं - ४/२६/१

[46] ऋग्. सं- १० / १६८ / ४

[47] ऋग्. सं - ०७/१०१/ ०४

[48] नि. ७/-४ १०, ११

[49] नि -७/१४, १५

प्रतिपादितः अस्ति । एवं सर्वोऽपि विचारः अनेन परिपूरितः अस्ति।

**देवतासु परमात्मतादात्म्यम्**

अत्र केचन वदन्ति ऋग्वेदः प्रकृतेः उपासनतः आरब्धः इति । यतः अत्र निर्दिष्टाः देवताः प्रकृतिशक्तेः प्रतिबिम्बिताः सन्ति ।यथा उषा, मरुत्, वायुः, आदित्यः, द्यौः, पृथिवी, पर्जन्यः, आपः, रात्रिः, अग्निः इत्यादयः सन्ति । देवताः प्रकृतौ विद्यमानायाः शक्तेः प्रतिबिम्बभूताः, ऋषयः तासां शक्तीनां उपासकाः इत्येव कथयन्ति । अत्र तथ्यमेवम् अस्ति यत् अस्मदृषयः ने केवलं प्रकृतिशक्तेः उपासकाः किन्तु प्रकृतौ विद्यमानस्य चैतन्यस्य द्योतकाः उषादयः देवताः सन्ति । उषादिदेवतामुखेन शुद्धं परमात्मानमेव स्तुवन्ति स्म । सर्वस्यापि आधारः अयं चैतन्यस्वरूपी ऋतज्ञः, ऋतस्वरूपी देवः इति मत्वा तत्साक्षात्कारार्थं स्वगूढबुद्ध्या प्रकृतिशक्तिद्वारा प्रयतन्ते स्म । ऋषयः तामेव विश्वशक्तिं मन्त्रैः स्तूयन्ते स्म ।

ऋग्वेददृष्ट्यालोकद्वयं प्रसुद्धं वर्तते । यथा प्रथमः अमृतलोकः, द्वितीयः अनृतलोकः इति । ऋग्वेदे उच्यते – 'सदनादृतस्य'[50] इति अमृतलोकस्य उल्लेखः। 'अनृतस्य भूरेः' [51] इति अनित्यलोकस्य उल्लेखः क्रियते । अत्र केचन मन्त्राः तस्य महिमानं वर्णयन्ति –

भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेष संदृक् ।[52]चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।[53]वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना । तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः ।[54] अक्ष्णश्चिद् गातुवित्तराऽनुल्बेन चक्षसा । निचिन्मिषन्ता निचिरा निचिक्यतुः॥[55] अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः । अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् ॥[56] वेद यस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः । ऋजु मर्तेषु वृजिना च पश्यन्नभिचष्टे सूरो अर्य एवान् ॥[57] क ईं स्तवत् कः पृणात् को यजाते यदुग्रमिन्मघवा विश्वहावेत् । पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः ॥ [58]रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय । इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥[59] वि मे कर्णा पतयतो वि चक्षु वीदं ज्योतिर्हृदय आहितं यत् । वि मे मनश्चरति दूर आधीः किं स्विद् वक्ष्यामि किमु नू मनिष्ये ॥ [60] एतादृशेषु मन्त्रेषु भगवत्स्वरूपस्य वर्णनं श्रूयते । एतादृशाः एव मन्त्राः दर्शनस्य मूलाः भवन्ति । सकलचराचरपदार्थाः तेन आत्मनाः अभिन्नाः इति कथयति – देवस्त्वष्टा सविता विस्वरूपः पुपोष प्रजाः पुरुधा जजान । इमा च विश्वा भुवनान्यस्य महद् देवानामसुरत्वमेकम्॥[61]

यथा ईश्वरेच्छा अस्मिन् प्रपञ्चे तथैव व्यवहरति लोकः – यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिद्रयाप्स्वा । महीमस्मभ्यमुरुषामुरु ज्रयो बृहत् सुवीरमनपच्युतं सहः ॥ [62] परमात्मा एकोपि बहुधा कल्पयन्ति इत्युक्तम् – सुपर्णं विप्रा कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति । छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश ॥[63] एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे । तं पाकेन मनसापश्यमन्तितस्तं माता

[50] ऋग्. सं – ०४/२१/३

[51] ऋग्. सं – ०७/६०/०५

[52] ऋग्. सं - ६/२२/९

[53] ऋग्. सं - १०/८२/१

[54] ऋग्. सं - ६/७/६

[55] ऋग्. सं - ०८/२५/९

[56] ऋग्. सं – ०१/१०२/२

[57] ऋग्. सं - ६/५१/२

[58] ऋग्. सं - ६/४७/१५

[59] ऋग्. सं - ६/४७/१८

[60] ऋग्. सं - ६/९/६

[61] ऋग्. सं- ६/५५/१९

[62] ऋग्. सं - ०५/४४/०६

[63] ऋग्. सं - १०/११४/५

रेळिह स उ रेळिह मातरम् ॥[64] एक एव परमात्मा सर्वेषु सृष्टेषु वस्तुषु ओतःप्रोतः रूपेण तिष्ठति । तं देवम् उपासकः परिपक्वज्ञानेन उपासते ।

घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टं मातरिश्वा जगाम । दिवस्पतयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कम् ॥ [65]

अर्थात् – सर्वत्र दीप्यमानौ जीवेश्वरौ त्रिगुणात्मिकां मायां व्याप्य तिष्ठन्ति । नियन्तृनियन्तव्यभावेन परमात्मा तत्र सम्भोक्तव्यपदार्थैः प्रीतिं गतवान् । तं परमात्मानं देवाः सूर्यमिति जानन्ति ।अनेके गृहस्थाः आत्मनः यथार्थरूपमजानन्तः कर्मफलोपभोगाय उपासते किन्तु क्रान्तदर्शिनः कवयः तु अग्न्यादिसृष्टीनां मूलकारणमिति जानन्ति ।एवं अनेकाः देवताशक्तयः अस्यां सृष्टौ विद्यन्ते चेदपि तासां देवतानां मूलकारणं परमात्मा इति पण्डितानां निर्णयः ।

**ग्रन्थसूची**


1. सायणमाधवः, सर्वदर्शनसङ्ग्रहः, भाण्डारकर् प्राच्यविद्यासंशोधन मन्दिरम्, पुण्यपत्तनम्, १९७८.
2. शास्त्री आचार्यजगदीशः, ब्रह्मसूत्रशङ्करभाष्यम्, मोतिलाल् बनारसीदास्, वाराणासी २००५.
3. शास्त्री कपालिः, collected works of T.V Kapali Shastri, दीप्तिप्रकाशनालयः,पुदुच्चेरि,१९८८
4. उपाद्यायः बलदेवः, संस्कृतवाङ्मय का इतिहास, उत्तरप्रदेह्श संस्कृत संस्थानम्, लखनौ २००६.
5. सायाणाचार्यः, ऋग्वेदभाष्यभूमिका, चौखाम्बा कृष्णदास् अकाडेमी,वाराणासी,२००५
6. निरुक्तम्, यास्कः, चैकम्बा संस्कृतप्रतिष्ठानम्, देह्लिनगरम्, २०१२
7. वैदिकसाहित्य चरित्रे, डा. एन् एस् अनन्तरङ्गाचार्, डि वि के मूर्ति प्रकाशकाः, मैसूरु, २००१


---

[64] ऋग्. सं - १०/११४/३

[65] ऋग्. सं - १०/११४/१